# Shri Sambaleshvari-Stotram

# શ્રીસમ્બલેશ્વરી-સ્તોત્રમ્

## Document Information

Text title : Sambaleshvari Stotram

File name : sambaleshvarIstotram.itx

Category : devii, stotra, otherforms, aShTaka, hkmeher

Location : doc_devii

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Stavarchana-Stavakam (Sanskrit Stotra-Kavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2023

*sanskritdocuments.org*

# શ્રીસમ્બલેશ્વરી-સ્તોત્રમ્

શ્રીસમ્બલેશ્વરી-સ્તોત્રમ્

લોકવન્દ્યા શક્તિરાદ્યા મહામાયા મહીયસી ।
જયતિ સા પરામ્બિકા દેવી શ્રીસમ્બલેશ્વરી ॥ ૧॥

કમનીય-કલેવરા શમની સર્વદુષ્કૃતામ્ ।
મમતામયી માતસ્ત્વં નમસ્તુભ્યં મહેશ્વરિ ! ॥ ૨॥

મહાનદી-તીરે રમ્યે મન્દિરે સુપ્રતિષ્ઠિતા ।
અધિષ્ઠાત્રી ત્વં સમ્બલપુરસ્ય પ્રિય-સમ્બલમ્ ॥ ૩॥

શાલ્મલીદ્રુમ-નિમ્નસ્થાં માલ્ય-મન્દાર-પૂજિતામ્ ।
કલ્મષાપહાં માતસ્ત્વાં નમામઃ સમ્બલેશ્વરીમ્ ॥ ૪॥

ઉત્સવે ધવલાનના સિન્દૂર-વદના સ્વયમ્ ।
જગદુદ્ધારિણી દેવિ ! શ્રદ્ધયા ત્વાં નુમો વયમ્ ॥ ૫॥

ત્ર્યમ્બક-વલ્લભા દેવી સમ્બલેશ્વરી પાવની ।
અમ્બુજાક્ષિ ! નમસ્તુભ્યં શમ્ભુ-શક્ત્યૈ નમોનમઃ ॥ ૬॥

તવાશીર્વાદઃ સર્વેષાં દદાતુ મનોવાઞ્છિતમ્ ।
તવ સ્નેહાઞ્ચલચ્છાયા ભક્તાન્ રક્ષતુ સૌખ્યદા ॥ ૭॥

અમ્બ ! ત્વં સમ્બલેશ્વરી દોષજાતં ક્ષમસ્વ નઃ ।
ત્રાયસ્વ વિપત્તારિણી દહ દુઃખં નમોઽસ્તુ તે ॥ ૮॥

સ્તોત્રં શ્રીસમ્બલેશ્વરી-દેવ્યાઃ પ્રિયં મુદાવહમ્ ।
વિનાશયતુ દુષ્કૃતં જગતાં તનુતાં શુભમ્ ॥ ૯॥

(ઇતિ શ્રીહરેકૃષ્ણમેહેર-પ્રણીતં શ્રીસમ્બલેશ્વરી-સ્તોત્રં સમ્પૂર્ણમ્ ।)

– રચયિતા : ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

*Shri Sambaleshvari-Stotram*

pdf was typeset on October 22, 2023

Please send corrections to *sanskrit@cheerful.com*